Shri Raghunath Temple MSS. Library,
JAMMU

No. १३१४

Title गुरु विषयता वादः

Author x

Extent १६ Age x

Subject न्याय शास्त्रं

विषयत्तावाद:

१३१४

न्यायकाषमाकातिसय

५५०

।।विषय. ।।श्रीगणेशायनमः।।श्रीमंगलमूर्त्तयेनमः ।। ।।बुद्धिर्नामकश्चिदात्मविशेषगुणस्तस्यचसिद्धिर्घटमहंजानामीत्याकारकाणामकरसा
१ धारणानुभवबलादेव।।साचसविषयिकातत्कधर्मिग्राहकमानात्याघटादिविषयकत्वेनैवतदवगाहनात्।।घटादिनिष्ठंत
द्विषयत्वंचतत्प्रतियोगिकसंबंधविशेषः।।सचप्रतियोगित्वादिवत्स्वरूपादनतिरिक्तएवक्लृप्तेनस्वरूपेणोपपत्तोऽत्र
तिरिक्तकल्पनायाअनवकाशात्।।नचतादृशसंबंधस्यज्ञानस्वरूपत्वाविषयस्वरूपतावास्वीक्रियतेइतत्रविनि
गमनाविरहादुभयस्यैवसंबंधताकल्पनीयातदपेक्षयालाघवात्संबंधत्वेनातिरिक्तैकविषयताकल्पनमेवोचितमि
तिवाच्यं।।विषयतायाविषयस्वरूपत्वेविषयेणसमंसमानस्याआधाराधेयभावानुपपत्तेर्ज्ञाननिरूपतायाएवतस्याउपगमा
त्।।अभेदेनअनारायणोप्याधाराधेयभावोपगमेघटादिज्ञानंविषयतावान्घटइतिवत्घटोघटवानितिप्रतीत्यापत्तेः।।
नचविषयतात्वावच्छिन्ननिरूपिताधिकरणतैवघटादावुपेयते।।घटत्वावच्छिन्ननिरूपिताधिकरणतेतिनायम
तिप्रसंगइतिवाच्यं।।तदवच्छिन्ननिरूपितत्वस्यतदाश्रयनिरूपितत्वविलक्षणस्यदुर्वचत्वात्।।अस्तुवाविनिगमना
विरहादुभयरूपमेवविषयत्वंतथापितादृशोभयस्यक्लृप्तत्वादतिरिक्तविषयतायास्तत्रज्ञानादिसंबंधतायाश्चकल्प श्री
नापेक्षयातदुभयस्यज्ञानादिसंबंधताकल्पनेगौरवानवकाशइतिसिद्धांताशयायिनः।।नव्यास्तु।।विषयत्वंप १

द्रार्थान्तरमेव न तु स्वरूपसंबंधविशेषः॥ तथा हि॥ ज्ञानविषयताया ज्ञानात्मकत्वे ज्ञानाधिकरणकालस्यापि ज्ञानविषयतापत्तिः।
कालनिष्ठतत्संबंधस्यापि तत्स्वरूपानतिरिक्तत्वात् एवं स्वाभावेन समं प्रतियोग्यनुयोगिभावरूपज्ञानसंबंधस्यापि स्वरूपानतिरिक्त
तया घटादिज्ञानस्य घटादिविषयकत्ववत् स्वाभावविषयकत्वस्याप्यापत्तिः॥ कालादौ ज्ञानादिसंबंधस्यातिरिक्तत्वे च
विनिगमनाविरहाद्विषयनिष्ठतत्संबंधस्याप्यतिरिक्तसिद्धिरिति भट्टपादैः॥ एवं विषयताया ज्ञानस्वरूपत्वे घटपटावित्या
दिसमूहालंबनात्मकैकज्ञानीयघटपटादिरूपनानाविषयनिष्ठविषयतानां ऐक्येन तादृशज्ञानानां घटत्वपटत्वाद्यवच्छि
न्नघटपटादिनिष्ठविषयताकतया भ्रमत्वापत्तिः॥ तद्वत्ति धर्मावच्छिन्नतन्निष्ठविषयताशालिबुद्धेरेव भ्रमत्वात्॥ ता
दृशज्ञानानंतरं घटत्वेन पटं जानामीत्याकारकानुव्यवसायापत्तिश्च॥ घटत्वाद्यवच्छिन्नपटनिष्ठविषयताघटत्वावच्छिन्न
विषयतात्वेन घट एव पटत्वाद्यवच्छिन्नविषयतात्वेन पट एव वर्तत इत्यनेन तादृशबुद्धेर्भ्रमत्वापत्तिः॥ तद्वन्निष्ठयोर्ध
र्मान्तरावच्छिन्नविषयतात्वेन तत्तद्वृत्तियोर्विषयतानन्तरितयोः॥ न एवं ज्ञानस्य भ्रमत्वात्। न वा तादृशसमूहालंबना
नंतरमुक्तानुव्यवसायप्रसंगः॥ घटत्वावच्छिन्नविषयतात्वेन पटादिनिष्ठविषयताप्रतियोगिन एव ज्ञानस्य तद्विषय
त्वादिति वाच्यं यतः पटत्वाद्यवच्छिन्नविषयतात्वेन घटादिवृत्तित्वं हितरूपावच्छिन्ननिरूपितघटादिनिष्ठाधिकरण

वि॰वा॰प णताकत्वंतादृशी चाधिकरणतायदि शुद्धविषयतात्वावच्छिन्ननिरूपिताधिकरणतातोऽनतिरिक्तातदा तादृशज्ञानीयघ
२ टादिनिष्ठविषयतायामपि तादृशाधिकरणताकत्वमक्षतमेव। अतिरिक्ता चेन्नहि किं अपराद्धमतिरिक्तविषयतयेति। विषयता
२ या विषयस्वरूपत्वे च घटत्वप्रकारकप्रमाविषयतायाः परत्वप्रकारकभ्रमनिरूपितायाश्च घटादिनिष्ठविषयताया ऐक्य
प्रसंगेन घटत्वप्रकारकप्रमायाश्चापि भ्रमत्वापत्तिः। एवं घटस्वद्भूतलं घटभूतलसंयोगा इति ज्ञानयोरविशेषप्रसंगश्च
विषयाणां तद्रूपात्मकविषयतानां चाविलक्षणत्वात्। न च प्रथमज्ञाने संबंधविधया भासमानस्य संयोगस्य संबंधोपधि
को भासते न तु समूहालंबनरूपे चरमज्ञान इत्यत एवोभयोर्वैलक्षण्यमिति तत्पाध्यायमतं सम्यक्। संयोगादिप्रतियोगिक
संबंधमादायापि समूहालंबनसंभवात्। न च संयोगसंसर्गकविशिष्टबुद्धौ संयोगः स्वरूपत एव भासते न तु संयोगत्वेन
सखंडपदार्थस्यापि संबंधविधया स्वरूपतो भानोपगमात् तदुक्तसमूहालंबने च संयोगत्वेन संयोगो भासत इति संयो
गत्वरूपाभिन्नविषयभानाभानाभ्यामेव तयोर्विशेष इति वाच्यं। एवमपि घटवद्भूतलं संयोगश्च घटभूतलसंयोगा
इति ज्ञानयोर्विशेषानिर्वाहात्। घटवद्भूतलमिति ज्ञानस्य घटप्रकारकत्वमेवेत्युक्तघटविशेष्यकसमूहालंबना श्री
द्विशेष इति चेत्। घटप्रकारकत्वं हि घटनिष्ठप्रकारताप्रतियोगित्वं। घटविशेष्यकत्वं च घटनिष्ठविशेष्यताप्रतियोगित्व॥ २

त तज्ज्ञानीयप्रकारताविशेष्यतयोर्यद्विप्रकारविशेष्याभ्यामनतिरिक्तेन तद्धोक्तविशिष्टबुद्धेर्घटविशेष्यकत्वं उक्तसमूहालंबनस्यापि घटप्र
कारकत्वं दुर्वारमेव घटात्मकयोस्त्रिष्टप्रकारताविशेष्यतयोर्भेदं मतेऽभिन्नत्वात् यदि चोक्तेऽतिरिक्ते तद्धाशिष्टं नः समीहितं प्र
कारताविशेष्यतयोर्विषयतात्मकत्वात् ॥ यत्तु भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वं तादृशवैशिष्ट्यानुयोगित्वं विशेष्य
त्वं न विषयतास्वरूपमिति तन्न सत् । उक्तसमूहालंबनस्यापि घटप्रतियोगिकवैशिष्ट्यविषयतया प्रकारकत्वापत्तेः । संयो
गादिरूपव्यधिकरणसंबंधेन द्रव्यत्वादिभ्रमस्य द्रव्यत्वादिप्रकारकत्वानुपपत्तेः । भूतले घट इति ज्ञानस्य भूतलघटप्रतियोगिकसं
योगादिविषयकतया भूतलादिविशेष्यकत्वापत्तेः गुणादौ संयोगादिसंबंधेन घटादिभ्रमस्य गुणादिविशेष्यकत्वानुपपत्ते
श्च । अथ यथा स्वत्व तादृशवैशिष्ट्यप्रतियोगित्वानुयोगित्वेन प्रकारत्वविशेष्यत्वे येनोक्तदोषावकाशः । अपि तु वैशिष्ट्यप्रति
योगितयानुयोगितया च भासमानत्वमेव प्रकारत्वविशेष्यत्वे चेति चेन्न ॥ प्रतियोगित्वमत्वादेस्तृतीयार्थस्य दुर्वचत्वा
त् । भासमानत्वस्य ज्ञानविषयतात्मकतया प्रकारताविशेष्यत्वयोर्विषयतात्वसिद्धेश्च ॥ यत्तु विषयत्वं न केवलं ज्ञानस्वरू
पं नापि केवलं विषयरूपं अपि तु ज्ञानविषयोभयरूपमतो न प्रागुक्तदोषावकाश इत्याहुः । घटपटादिविषयादिसमूहाल
वनीयघटादिनिष्ठतत्तद्ज्ञानघटोभयात्मकघटत्वाद्यवच्छिन्नविषयतायाः पटादिनिष्ठतज्ज्ञानपटाद्युभयात्मकपटत्वा

गु॰ वि॰ वच्छिन्नविषयतानात्मकतयाऽनन्तादृशज्ञानस्य भ्रमत्वापत्तेः ॥ नचैवमप्युदर्शितविशिष्टधीसमूहालंबनयोरविशेषप्रसंगः । तादृशस
२ मूहालंबनस्य तथाविधविशिष्टधीनिरूपितज्ञानघटात्मकप्रकारत्वानिरूपकत्वेन विषयतावैलक्षण्यसत्त्वादिति ॥ तदप्यसत् ॥
3 घटपटाविमौ इत्यादिसमूहालंबनात्मकज्ञानस्य तु ज्ञानपटोभयात्मकपटत्वावच्छिन्नपटनिष्ठविषयताघटकत्वेन घटत्वावच्छि
न्नघटनिष्ठतादृशज्ञानघटोभयात्मकविषयता घटकत्वेन च घटनिष्ठायाः पटत्वावच्छिन्नाया ज्ञानरूपविषयतायास्ति
रूपकत्वेन भ्रमत्वापत्तेर्दुर्वारत्वात् ॥ अपि तु धर्मावच्छिन्नविषयतात्वं तु ज्ञानं तन्निष्ठप्रयोज्यासंभवदुपपद्यते । एवं च त
द्धर्मावच्छिन्नविषयतात्वेन तद्धर्मानधिकरणवृत्तित्वं यो विषयतान्त्वमिति योगित्वमेव भ्रमत्वं । उपदर्शितसमूहालंबने प
टत्वावच्छिन्नविषयतात्वस्य तादृशज्ञानपटोभयपर्याप्ततया तेन रूपेण तदुभयात्मकविषयता न घटादिवृत्तिः । घटादेस्तदु
पाश्रयपर्याप्तात्मकविषयतासंबंधित्वात् स्वाश्रययावद्व्यक्तिसंबंधिनैवाव्यासज्यवृत्तिधर्मपुरस्कारेण तदाश्रयत्वादि
ति न तस्य भ्रमत्वापत्तिरिति चेत् पटत्वाद्यवच्छिन्नविषयतात्वं स्वरूपान्तरिक्तं न वा । आद्ये किमपराद्धं तद्रूपावच्छिन्नाति
रिक्तविषयतया । अतिरेके च मस्तु व्यासज्यवृत्तित्वानुपपत्तिः । तत्त्वस्वरूपसम्बन्धस्य विश्रान्तत्वात् । एवं तद्रूपेण घटादिवृत्तित्वं वि श्री
षयतात्वे घटादिवृत्तित्वादेरनतिरिक्तं न वा आद्ये किमपराद्धमतिरिक्तविषयतया । अंते तद्रूपेण घटादिवृत्तित्व २

तादृशज्ञानीयस्वात्मकविषयतायाश्च स्वत्वमेव । एवं जातिमान् घट इत्यादौ घटत्वाद्येकविषयतानिरूपकज्ञानीयविषयताभिन्नत्वाद्यवच्छि
न्नत्वतदनवच्छिन्नत्वाभ्यां द्वैविध्यमनुपपन्नं ज्ञानस्य विषयस्य च द्वैविध्यविरहात् । तथा च जातिमान् घट इत्याकारकैकवि
षयघटत्वादिविषयताशालिज्ञानात् तादृशज्ञानस्य विलक्षणविषयताशालित्वानुपपत्त्या विलक्षणकार्यकत्वानुपपत्तिः । त
स्माद्विषयत्वमतिरिक्तमेव । अथ विषयतावद्विषये ऽनुयोगितास्वरूपसंबंधः । ज्ञाने प्रतियोगितास्वरूपसंबंधश्च तत्स्वयुक्त्या
ऽतिरिक्त एवोपगंतव्यः । स्वरूपानतिरिक्तत्वे ज्ञानविषयनिष्ठयोस्तत्संबंधयोरविलक्षणतापत्त्या ज्ञानस्येव विषयस्यापि सवि
षयकत्वापत्त्या विषयवद् ज्ञानस्यापि तद्विषयत्वमापद्येत । एवं विषयताया ज्ञानघटादिनिष्ठेन संबंधेन समकालाभावादिनिष्ठसंबं
धस्यापि तत्स्वरूपतया ऽनतिरिक्तत्वेन वैलक्षण्यानुपपत्त्या कालान्तरादीनामपि घटादिविषयकत्वापत्तिः घटज्ञानादिवि
षयतापत्तिश्च । एवं तत्स्वयुक्त्या तादृशसंबंधस्यापि संबंधस्तत्संबंधादिरप्यतिरिक्तः स्वीकरणीय इत्यनवस्थितसंबंधधाराकल्पन
प्रसंगः । एवं विषयतासंबंधज्ञानस्यानंतरीयताऽनियामकोऽनिरूपकत्वात् स्वरूपसंबंधविशेषस्तु तत्स्वयुक्त्या अतिरिक्तः स्वीकरणी
यः । एवं तत्संबंधादिरपि अतिरिक्तश्चापि संबंधधारायामनवस्थापत्तिरिति चेत् काक्षतिः । नहि प्रामाणिकानवस्थाया दूषणावह
त्वं । एवं विषयतावद्विषयितारूपज्ञानानुयोगिकविषयसंबंधोऽतिरिक्त एव । न तु विषयताप्रतियोगित्वमेव विषयि

वि॰ वा॰ त्वं विषयित्वमेवातिरिक्तं तत्त्वातिरिक्तं तत्त्वनियागित्वमेव विषयत्वमित्यस्यापि वक्तुं शक्यत्वात् द्वयोरेवातिरिक्तत्वासिद्धेरिति। विषयता च वि

४ षयभेदाद्भिद्यते।। अन्यथा घटपटावित्यादिसमूहालंबनीयघटपटादिनिष्ठविषयताया एकापूर्वोक्तरीत्या तादृशज्ञानस्यापि अ

मत्वापत्तेः। घटादिघटैकविषयकज्ञानीयैकैकविषयतातः समूहालंबनेनोनाविषयत्वस्यातिरिक्तैकविषयताकल्प

नप्रसंगेन गौरवाच्च। अस्मिन्नये समूहालंबने प्रत्येकज्ञानीयविषयतानामेवोपगमात्। ज्ञानभेदेन विषयताभेद

मानाभावाच्च। एतेन घटद्रव्यादिविशिष्टबुद्धेर्विशेष्यविशेषणभावापन्नघटघटत्वादिपुरोकैव विषयता। ननु विशेष्य

निष्ठविशेषणनिष्ठा च विषयता भिन्नाभिन्नेति मतं हेयमेव। विशेष्यनिष्ठया विशेष्यतात्मकविषयतया समं विशेषण

निष्ठप्रकारतात्मकविषयताया अभेदस्यासंभवदुक्तिकत्वात्। तथा सति तादृशबुद्धौ घटप्रकारकत्वघटत्वविशेष्यक

त्वयोरापत्तेः। न च प्रकारताविशेष्यतयोर्विषयतारूपत्वं यामेवेयमनुपपत्तिः सेव्यता। अपितु पदार्थान्तरत्वात् तयोर्विषयता

त्वे मानाभावादिति वाच्यं। विषये अतिरिक्तविषयतानां तत्र च विषयतात्वकल्पनापेक्षया विषयत्वनिरूपितत्वेन क्लृप्तानां वि

शेष्यताप्रकारतानां। विषयतात्वकल्पनस्यैवोचितत्वात्।। यत्तु निर्विकल्पकीयाप्रकारताविशेष्यताभिन्नत्वेनोभयव श्री

सिद्धायाविषयताविशिष्टज्ञानस्यापि सैव विषयसंबंधः। तत्र एव च दिशि षष्ठ्युद्धरीपत्तद्विषयकत्वनिर्वाहः। तदा किं प्र ४

कारतादीनांविषयतात्वोपगमेन।प्रकारतादीनांविषयतानात्मकत्वेपि तद्वैलक्षण्यस्यापि सज्ञाने वैलक्षण्यस्योपसंग्राहकस्य चिद्विरोधः इत्यपि
हेयमेवप्रकारताविशेष्यतयोर्विषयतात्वानुपगमेव्याप्यपक्षविशेष्यकपरामर्शीयाव्याप्यविषयतानिरूपितपक्षविषयताशालित्वे
नानुपगमय्यानुमितिहेतुत्वासंभवात्।कारणवाद्यस्यापत्तेः।।निर्विकल्पकीयविषयतायाः परस्परनिरूप्यनिरूपकभावविरहात्।
एवंसंसर्गज्ञानस्यानुपनायकतामते उपनीतभानंप्रति उपनायकज्ञानस्य तत्प्रकारकत्वेन तद्विशेष्यकत्वेन च हेतुताद्वयप्रसं
गः।मन्मते प्रकारताविशेष्यतासंसर्गभिन्नविषयतात्वेनानुगमस्य एकहेतुताकल्पनसंभवात्।एवंनिर्विकल्पकीयविषय
तायाः विशिष्टबुद्धावुपगमे घटत्वादिनिर्विकल्पकादिवज्जातित्वादिना घटत्वादिज्ञानादपि स्वरूपतो घटत्वादिप्रकारका
या घट इत्याकारकविशिष्टबुद्धेरापत्तिः।न च रूपतस्तद्विशिष्टबुद्धौ तद्विशेष्यकतद्ज्ञानत्वेन हेतुत्वान्नायंदोष इति वा
च्यं।तथासति जातिर्घटश्चेत्यादिज्ञानात् घट इत्यादिविशिष्टबुध्यनुपपत्तेरिति।।यत्तु विशिष्टबुद्धिविषयता विशेष्यमात्र
वृत्तिः न तु विशेषणेऽप्रसामानाभावात्।न च विनिगमनाविरहः।घट इतित्यादिज्ञानानंतरं घटज्ञानामीत्याद्यनुव्यवसा
येन घटरूपविशेष्येण समं ज्ञानस्य संबंधावगाहनात्।घटादिरूपविशेष्यज्ञानस्य विषयतात्मकसंबंधस्यानुव्यवसायेऽपि यत्वाग
तः।घटत्वज्ञानामीत्याद्यनुव्यवसायस्तु तत्रापि द्व्यक्तस्य घटत्वविशिष्टे विशिष्ट्यावगाहित्वेन घटत्वत्वप्रकारकव्यवसा

यानंतरमेव तत्संभवात्। घट इत्यादिव्यवसायस्य च स्वरूपत एव घटत्वादिप्रकारकतया घटत्वत्वाद्यप्रकारकत्वात् ज्ञानांशे स्वरूपतो घटत्वा
५ दिविशेषणकोऽनुव्यवसायोपि न तत्र संभवति संबंधिकपदार्थप्रसक्ष्यस्य किंचिद्विशिष्टसंबंधिवैशिष्ट्यावगाहित्वनियमात्। न चा
यं घट इत्यादिव्यवसायानंतरं घटत्वेन मज्ज्ञानमित्याद्याकारकानुव्यवसायेन घटत्वादिरूपविशेषणेनापि स मज्ज्ञानस्य संबंधा
5 वगाहनात् तत्रापि विशिष्टधीविषयताभ्युपगमस्यावश्यकत्वमिति वाच्यं यतस्तत्र ज्ञानान्वयि वैशिष्ट्यं न तत्तीयार्थः। अपि तु द्विती
यार्थे विषयतान्वयि घटत्वादिप्रकारकत्वं न च विषयतानिष्ठघटत्वादिप्रकारताया विषयताविशेषात्मकत्वादिति वाच्यं या
तो विषयतानिष्ठघटत्वादिप्रकारकत्वं न घटत्वादिनिष्ठप्रकारताख्यविषयतानिरूपकत्वं। अपि तु घटत्वाद्यवच्छिन्नत्वं अव
च्छिन्नत्वं च प्रतियोगित्वकारणताधिकरणत्वादाविव विषयतादावपि घटत्वादेः संबंधविशेष एव स चातिरिक्तोऽनतिरि
क्तो वेत्यन्यदेतत्। इयांस्तु विशेषः प्रतियोगित्वादावन्यूनानतिप्रसक्तत्वेनावच्छेद्यावच्छेदकभावे तंत्रं। न तु विषयतास्थलेव्य
धिकरणधर्मस्यापि विषयतावच्छेदकत्वात् विशेषणनिरूपितत्वमेव वा विषयतानिष्ठतत्प्रकारकत्वं। अस्तु वा विशेषणेवि
षयतानिरूपितः प्रकारताख्यधर्मविशेषस्तथापि तस्य विशिष्टज्ञानविषयत्वेन तद्धर्मविशिष्टज्ञानानंतरं तद्धर्मविशिष्ट म्रो
ज्ञानानुपपत्तेः। विशिष्टवैशिष्ट्यविशेषणविषयकज्ञानस्य हेतुत्वात्। भवन्मते तद्विशिष्टज्ञानस्य तद्विषयकज्ञानात्वा ५

भावेन तद्धेतुत्वात्। एवं विशिष्टज्ञानाद्विशेषणविषयकोपनीतभानस्याप्यनुपपत्तिः। तदुपनीतभानेन तद्विषयकज्ञानसंस्कारस्यैव हेतुत्वा
त्। एतादृशयुक्त्या विशेषणस्य विशिष्टधीविषयताया आवश्यकत्वे च उक्तलाघवात् विशिष्टप्रकारताया एव विषयतात्वसिद्धि
रित्यवधेयं। अथ तद्विशिष्टबुद्धौ तदुपनीतभाने च स्ववृत्तित्वस्वप्रकारकत्वान्यतरसंबंधेन तद्विशिष्टाया विषयतावच्छिन्नज्ञा
नत्वेनैव हेतुता वाच्या। इत्थं च विशेषणस्य विशिष्टज्ञानाविषयत्वेपि तद्विशिष्टज्ञानात्तद्विशिष्टज्ञानान्तरस्य तदुपनीत
भानस्यानुपपत्तिः। न चाप्रदर्शितकारणतावच्छेदककोटौ अन्यतरसंबंधेन तद्विशिष्टस्य विषयतायां निष्ठज्ञानान्तरस्य
तदुपनीतभानस्यानुपपत्तिः। नैवं प्रदर्शितकारणतावच्छेदककोटौ अन्यतरसंबंधेन तद्विशिष्टस्य विषयतायां निवेशोऽत्र
न्यतरत्वघटकभेदद्वयामिथो विशेषणविशेष्यभावे विनिगमनाविरहेण कारणताबाहुल्यमिति वाच्यं। यत्तत्त्वाद्यन्यतर
स्यान्यतरत्वेन न संबंधतापि तु स्वरूपत एव। न चैवमप्यननुगमात् तत्कारणताधिक्यं व्यभिचारश्चेति वाच्यं। संबंधानाम
पि स्वप्रकारकत्वस्ववृत्तित्वान्यतरसंबंधेन तद्विशिष्टविषयतामपेक्ष्य स्ववृत्तित्वसंबंधेन तद्विशिष्टविषयताया लाघ
वेन तद्विशिष्टबुद्ध्यादिजनकत्वसिद्धेः निष्प्रत्यूहतया विशेषणस्यापि विशिष्टधीविषयत्वं दुर्वारमिति वाच्यं। प्रकारतायां
विषयतात्वोपगमेव घटत्वादिरूपेण घटादिविषयकस्मरणदौ तथाविधज्ञानस्य घटत्वादिप्रकारतानिरूपितघटा

६ दिमिष्ठविषयताशालिज्ञानत्वेनघटादिनिष्ठविशेष्यतानिरूपितघटत्वादिप्रकारताशालिज्ञानत्वेन वा हेतुत्वे गौरवात् [illegible] स्मन्मते च
नैतादृशविनिगमनाविरहावकाशः। विशेष्यतानिरूपितप्रकारतायाः ज्ञानप्रतियोगिकत्वाभावेन परंपरासंबंधेनैव तस्या
6 ज्ञानकतावच्छेदकत्वस्योपगन्तव्यतया तत्पृष्ठतया प्रकारतानिरूपितविशेष्यतायाः प्रतियोगितासंबंधेन जनकतावच्छेदकत्वे
लाघवं स्वगर्भविनिगमकत्वात्। मैवं। उक्तविशेषणज्ञानादिकारणतावच्छेदकलाघवेन प्रकारतायां विषयतात्वस्य ज्ञान
प्रतियोगि। त्वस्य च सिद्धत्वात् स्वदर्शितस्मरणादिहेतुतायां विनिगमनाविरहावतारेण वा गौरवावतारात् तादृशगौरवस्य फल
मुखत्वेनादोषत्वात्। यतः सिद्धिमुपजीव्य गौरवावतारः स नास्ति ह्यत्र तेषां विरोधित्वासंभवात् घटत्ववन्नभूतलमित्यादिविशिष्ट
बुद्धावनंतरं भूतलज्ञानामीत्यनुव्यवसायवत् घटज्ञानामीत्याकारकस्य ज्ञानघटादिसंबंधावगाहिनो ऽनुव्यवसायस्या
पि सर्वानुभवसिद्धतया विशेषणेपि विषयतात्मकज्ञानसंबंधस्यावश्यकः। न च तत्र स्वप्रकारकविषयताकत्वरूपपरंपरा
संबंधेन ज्ञाने घटस्यानुव्यवसायेन ग्रह्यते इति वाच्यं। विशेषणीभूतघटादिरेव तादृशविशिष्टबुद्धिविषयः। न तु भू
तलादिरूपविशेष्यीभूतलज्ञानामीत्यनुव्यवसायेन तत्स्वांशे [illegible] विशेष्यकविषयताप्रतियोगित्वरूपं भूतलादिनिरूपितपरं श्री
परासंबंधावगाहनादोषग्रह्यत इत्यस्यापि सुवचत्वया विनिगमनाविरहेण विशेषणविशेष्ययोरुभयोरेव विशिष्टधी वि ६

षयतासिद्धेर्निरोधाधत्वादित्याहुः विशेष्यताप्रकारतावत्संसर्गत्वस्यापि विषयतात्वविशेषात्मकत्वात्संसर्गस्यापि विशिष्टधीविष
यत्वं। अत्रेदं चिन्त्यं खलाः। संसर्गस्य विशिष्टधीविषयत्वे मानाभावः। घटइत्यादिज्ञानेन संसर्गमयं जानामीत्याद्याकारकोनुव्यवसायस्या
सिद्धत्वात् प्रत्युत ज्ञानानुव्यवसायस्य समवायत्वविशिष्टवैशिष्ट्यावगाहितया समवायत्वप्रकारकज्ञानानन्तरमेव तत्संभवात्। अत्र
र्थविशिष्टबुद्धेः संसर्गानवगाहित्वे बाधबुद्धिप्रतिबंधकतायाः संसर्गविशेषनियंत्रितत्वासंभवात्कपालधर्म्मिकसंयोगादि
संबंधावच्छिन्नप्रतियोगिताकघटाभाववत्तानिश्चयस्य समानधर्मितावच्छेदकं किंचिद्घटादिप्रकारकज्ञानं प्रति बध्यं न
त्वसर्वं मितस्यानुभवव्याकोपः। न च बाधप्रतिबंधकतायाः संबंधविशेषनियंत्रितत्वानुरोधेन तत्प्रतिबध्यसधर्मितावच्छेदकबुद्धेः
संबंधावगाहित्वसिद्धावपि निर्द्धर्मितावच्छेदकबुद्धेस्तथात्वे नियुक्तिकमिति वाच्यं निर्धर्मितावच्छेदकविशिष्टबुद्धेरपिग्रा
ह्यधर्मिकाहार्य्यत्वज्ञानप्रतिबध्यतया अप्रवृत्तित्वज्ञानप्रतिबंधकतायाः संबंधविशेषनियंत्रितत्वानुरोधेन तत्रापि सं
बंधावगाहित्वस्यावश्यकत्वात्। एवं प्रमात्वभ्रमत्वयोः संबंधविशेषानियंत्रितत्वानुरोधेनापि सकलविशिष्टबुद्धीनां सं
बंधावगाहित्वमावश्यकं। तयोस्तथात्वानुपगमे कपालत्वविशेष्यकघटादिप्रकारकं किंचिद्वज्ञानं प्रमा तथाविधं च किंचि
द्वज्ञानं भ्रम इति प्रतीतिर्न स्यात्। अपि तु कपालादेः समवायेन घटादिमत्तया तथाविधसकलमेव ज्ञानं प्रमा स्यात्। सं

७ योग्यादिसंबंधावच्छिन्नप्रतियोगिताकघटाभाववत्तया च तथाविधसंसर्गकत्वमेव ज्ञानं प्रमः स्यादिति चेन्न्याविशिष्टबुद्धेः संबंधविषय
कत्वानभ्युपगमेपि तटस्थेन संसर्गेण समं प्रकारताया अवच्छेद्यावच्छेदकभावोपगमाद्वाधप्रतिवध्यतावच्छेदकसमप्रमात्वप्र
मात्वयोरसंबंधविशेषावच्छिन्नप्रकारताघटितत्वादुक्तानुपपत्तिवारणसंभवात्। न च प्रकारतानिरूपिते सांसर्गिकवि
षयताश्रयत्वमेव संसर्गस्य प्रकारतावच्छेदकत्वं अन्यथाप्युपस्थितत्वादिति संसर्गस्य विशिष्टधीविषयत्वसिद्धिर्निमत्वहे
वेति वाच्यं। प्रतियोगित्वादिनिरूपिताया इव प्रकारतानिरूपितताया अपि संसर्गनिष्ठावच्छेदकतायाः स्वरूपसंबंधरूप
त्वात्पदार्थान्तरस्वरूपत्वाद्वा। विषयताविशेषात्मकत्वेपि तद्रूपतायामुक्तत्वात्। तस्माद्विषयतात्वस्य निर्युक्तिकत्वात्तादृ
शावच्छेदकभावविशेषशब्दवर्णसंसर्गतापदार्थः। न तु विषयताविशेषः। अथ संसर्गस्य विशिष्टबुद्धौ विषयत्वेन संसर्गे कज्ञा
नात्तद्विशिष्टबुद्धिमदुपनीतभानानुदयप्रसंगः। न च तन्मतस्यायुक्ततास्यानुभवविकल्पाभावादिष्टापत्तिः। तथा सति स्व
रूपतो मनस्त्वादिविशिष्टवाचकमनःपदाघटितशाब्दबोधानुपपत्तेः। तथाहि। मनःपदात्स्वरूपतो मनस्त्वप्रकारि
काशाब्दधीर्भविष्यति। अत्र च स्वरूपतस्तत्प्रकारकत्वं किं ज्ञानपदार्थोपस्थित्यादिः कारणं जातित्वादिना तत्प्रका श्री
रकता किं ज्ञानादितो जातित्वादिनैव तत्प्रकारकशाब्दबोधोदयात्। अन्यथा कदापि विज्ञातित्वादिना तत्प्रकारकः ७

कदाचित्स्वरूपत्वप्रकारकशाब्दबोधानुपघातादस्य नियामकाभावप्रसंगात् । स्वरूपत्वप्रकारकव्यक्तिज्ञानपदार्थोपस्थिस्थित्ता
दिकं च स्वरूपत्वत्वद्विषयकज्ञानं विना न संभवति स्वरूपत्वविशिष्टबुद्धौ स्वरूपत्वतद्विषयकज्ञानस्य हेतुत्वात् । स्वरूपत्वोम
नेस्त्वादिविषयकं च निर्विकल्पकज्ञानं न संभवति । अतीन्द्रियस्य निर्विकल्पकाविषयत्वात् । निर्विकल्पलौकिकत्वनियमात्
स्वरूपत्वप्रकारकज्ञानसापेक्षत्वे चात्रापि तादृशज्ञानसापेक्षणे अनवस्थाप्रसंगः । अस्मन्मते च स्वरूपत्वोसं
सर्गकविषयाकिंचिद्ज्ञाने मनस्त्वादिभानं स्वीकृत्य तन्मूलकात् स्वरूपत्वप्रकारकशाब्दादिज्ञानात्तथाविधशाब्द
धिय उपपत्तिः । न चैवं स्वरूपत्वेऽनिखिलजातिसंसर्गकज्ञानात्स्वरूपत्वे निखिलजातिप्रकारकज्ञानसंभवेन सार्वज्ञाप
त्तिरिति वाच्यं । फलबलात्कस्यचित्पदार्थस्य कदाचित्संसर्गविधया नानापगमेन स्वरूपत्वसंसर्गतया निखिलजाति
भानस्य कदाचिदप्यनुपगमादिति चेन्न । तत्संसर्गकज्ञानस्य तद्विशिष्टबुद्धिजनकत्वेऽपि स्वरूपत्वामनस्त्वप्रकारकस्म
रणमूलकतथाविधशाब्दादिज्ञानात्तथाविधशाब्दबोधनिर्वाहात् । न च स्वरूपत्वप्रकारकस्मरणे स्वरूपत्वप्र
कारकानुभवसापेक्षितत्वया तदसंभवेन तदसंभव इति वाच्यं । भवांतरप्रभवानुभवाहितसंस्कारैरेव तथाविधस्मरणो
पपत्तेः । न च जन्मांतरीयतथानुभवेऽपि पर्यवेक्षणात्वसमृष्य । तत्रात्मोक्तेन जन्मजातत्वतथाविधानुभवाहितसंस्का

रमूलकस्मरणस्यगतित्वात्। तन्मप्रवाहस्यानादितया तादृशानवस्थाया अकिंचित्करत्वात्। अथवा जातित्वादिना मनस्त्वप्रकार
२ केतद्बुद्धिपानुभवसंस्कारादेव रू स्वरूपतस्तत्प्रकारकस्मरणमुपपद्यते सामान्यतस्तत्प्रकारकस्मरणे तत्प्रकारकत्वेनैव ज्ञानसंस्का
4 रयोः कारणत्वात् स्वरूपतस्तत्प्रकारकस्मृतौ स्वरूपतस्तत्प्रकारकत्वेन तयोर्हेतुतायाम् अप्रामाणिकत्वात्। न चैवं ज्ञातित्वा
दिना मनस्त्वादिप्रकारकस्मरणमात्रस्यैव स्वरूपतस्तत्प्रकारकत्वापत्तिरिति केवलं ज्ञातिमात्रनिसाकारकस्य स्मरणस्य विलो
पप्रसंग इति वाच्यं। स्वरूपतस्तत्प्रकारकस्मरणे उद्बोधकविशेषस्यैव नियामकत्वात्। मनः इत्याद्याकारस्मरणं यत्रानुभव
सिद्धं तत्रैव तादृशोद्बोधकस्य फलबलेन कल्पनीयत्वात्। अन्यथा ज्ञातित्वेन स्वरूपतः मनस्त्वप्रकारककेवलिकानुभवदृ
याहितसंस्कारवतः पुंसो भवन्मतेपि स्वरूपतो मनस्त्वप्रकारकज्ञातिमात्रनिसाकारकमनस्त्वप्रकारकस्मरणविलोपापत्तिः।
न वज्ञातित्वेन मनस्त्वप्रकारकसंस्कारात् स्वरूपतो मनस्त्वप्रकारकस्मरणं न संभवति तत्र मनस्त्वांशे ज्ञातित्वभाने
बाधकाभावादिति वाच्यं। तदंशे ज्ञातित्वभानेपि ज्ञातिमन्मन इत्याकारकतद्द्वयोर्विशिष्टविषयतानां शालिनः स्मरणस्य
संभवात्। वस्तुतस्तु ज्ञातित्वांशे मोषदशायां तथाविधसंस्कारान्मन इत्याकारकस्मरणं निराबाधमेव। तदंशे मो श्री
षध्वंसस्तूद्बोधकोद्बोधकासमवधानं। न च किंचिद्रूपेण तत्प्रकारकसंस्कारादपि स्वरूपतस्तत्प्रकारकस्मरणस्य मोषव

ज्ञादुत्पन्नो जातित्वादिसामान्यप्रत्यासत्तिजन्यतत्प्रकारकनिखिलजातिविषयकानुभवादिजसंस्कारात् जातित्वांशे मोषदशायां स्वरूपतो।
खि। खिलजातिप्रकारकस्मरणसंभवात् सार्वज्ञापत्तिरिति वाच्यं। उद्बोधकस्य फलबलकल्पनीयतया जातित्वाद्यंशे मोषदशायां
निखिलजातिभासकोद्बोधकस्याकल्पनेनापत्तिविरहादित्यलं पल्लवितेन ॥ ७ ॥ इदं च विशिष्टसंविदः संबंधानवच्छिन्नविषतान
कथंचिदपि किंचिदुन्निरोहमावहतीति युक्तिं तत्रान्यायवैशेषिकनया स्वसिद्धांतविरोधः प्रतिरुणद्धि॥ केचित्तु। विशिष्टसं
सर्गत्वं द्वैविशिष्टसंसर्गघटकविशेषणीयसंसर्गतायां प्रकारतात्वं तथाविधविशेष्यीयसंसर्गतायां विशेष्यतात्वमात्ररूपकं।
अन्यथा कंबुग्रीवादिमत्त्वावच्छिन्नत्वरूपेण प्रतियोगितासंसर्गक कंबुग्रीवादिमान्नास्तीत्यसाधारणकबुद्धेर्भ्रमत्वानु
पपत्तेः। तथाहि। तादृशज्ञानं अभावांशे प्रतियोगितासंबंधेन न घटस्य भ्रमस्तेन संबंधेनाभावस्य घटवत्त्वात्। नापि कं
बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितासंबंधेन तदंशे तस्य भ्रमः। विशिष्टसंबंधाप्रसिद्धेः। नाप्यनवच्छिन्नप्रतियोगि
ताकत्वसंबंधेन तदंशे कंबुग्रीवादिमतो भ्रमः। तदंशे तस्याप्रकारकत्वात्। तथा सति तादृशधर्मविशिष्टविशिष्टत्वेना
भावेऽप्रोक्तत्वापत्तेः। अन्यत एव प्रतियोगितावच्छेदकत्वसंबंधेन तादृशधर्मांशेऽभावस्य भ्रमत्वेऽपि न तद्धर्मांशेऽभा
वस्याप्रकारत्वात्। नापि प्रतियोगित्वांशे कंबुग्रीवादिमत्त्वावच्छिन्नत्वस्य प्रतियोगितावच्छेदकत्वांशे कंबुग्रीवादिम

त्रि०वा० त्वस्यवाच्यत्वमः। तस्य संसर्गघटकतया ऽप्रकारत्वादिति।। तस्मात्संसर्गताविशेष्यप्रकारतात्वविशेष्यतात्वेनैवीकृतपश्चात्स्वनिरूपितपक्ष्यराव
८ पक्षणी। यइति संसर्गस्यापि विशिष्टधीविषयतासिद्धिः प्रकारतात्वादेर्विषयताऽलखाप्यत्वादित्याहुः।। तदपि न शोभनं तया
प्रतिभासितरूत्वब्वोप्रतियोगिविशेषणतापन्नस्यकबुद्धीवादिमत्वादेरभावांशे प्रकारतोपगमे श्रुतिविरहेण तदंशे तद्भ्रम
9 त्वस्येव संभवात्स्वातंत्र्यप्रकारतासत्वाविशेषणत्वेन विशेष्यत्वे। स्यात्। अत एव तद्दंडी चैत्रः कुंडलीत्यादिविशिष्टानु
योगिकवैशिष्ट्यबुद्धौ समानकालीनत्वसंबंधेन विशेष्यतावच्छेदकदंडादेर्विधेयकुंडलाद्यंशे प्रकारत्वेऽपि न दंडवत्कुंड
लीत्याद्याकारकता। न च प्रकारतायाः पारतंत्र्यं दुर्निर्वचमिति वाच्यं। उक्तस्थले स्वप्रतियोगिनिष्ठविशेष्यतानिरूपितप्रका
रतावच्छेदेनैवाभावांशे कंबुग्रीवादिमत्त्वादेः प्रकारतोपगमात् तद्विशेष्यतानिरूपितप्रकारतावच्छिन्नत्वस्यैव तत्पारतंत्र्य
पदार्थत्वात्।। यत्तु तत्र प्रतियोगिविशेष्यतया ऽभावविशेष्यतया च निरूपिता एकैव प्रकारता स्वीक्रियते। स्वातंत्र्येण
प्रकारतास्थले तु विशेष्यभेदेन प्रकारताभेदः तादृशप्रकारताया एकैकज्ञानसाधारणत्वात्। एवं च तदीयविशेष्यता
निरूपितप्रकारताभिन्नत्वमेव तत्पारतंत्र्यं। न चैवं प्रमितादृशज्ञानस्याभावांशे घटवत्प्रतियोगिसंयोगस्वावच्छिन्नप्रतियोगि श्री
ताकत्वसंबंधेन कंबुग्रीवादिमत्त्वे प्रकारकत्वापत्तिः। अभावविशेष्यतानिरूपिततत्संबंधावच्छिन्नप्रकारताया एव प्र ८

न्मवत्ते प्रतियोगिविशेष्यतानिरूपितप्रकारतात्मकत्वात्। तथा च नात्ह्रदाज्ञानं प्रतियोग्यंशे पितस्य अभ्रमस्येति वाच्यं। नोहृदाज्ञानस्य
हि प्रतियोगिनिष्ठविशेष्यतानिरूपिततत्संबंधावच्छिन्नकंबुग्रीवादिमत्त्वप्रकारताशालित्वेपि प्रतियोगिनिष्ठविशेष्यतानिरू
पितायाताद्दृशसंसर्गनिष्ठसंसर्गताजन्निरूपकतद्धर्मप्रकारकत्वेनाभिनात्ह्रदसंसर्गनिष्ठसंसर्गताया अभावविशेष्यत
येव समं निरूपणनिरूपकभावोपगमात्। इत्थं च तन्निष्ठविशेष्यतानिरूपिततत्संसर्गनिष्ठसंसर्गतानिरूपकतद्धर्मप्रकारत्व
मेव तद्देशो तत्संबंधेन तद्धर्मप्रकारकत्वमतो न दर्शितातिप्रसंग इति ॥ तत्समतत्तथा सति प्रतियोग्यंशे तात्ह्रदाज्ञानीयकं
बुग्रीवादिमत्त्वप्रकारताया अपि अभावपारतंत्र्यापत्तेः। तद्विशिष्टबोधकशब्देन प्रतियोग्यनुल्लेखापत्तेः। अथ प्रतियोगि
विशेषणीभूततद्धर्मस्याभावांशे निरुक्तप्रकारताकल्पनापेक्षया संसर्गतायां प्रकारतात्वादिकल्पनमेवोचितं धर्मिकल्पनातो ध
र्मकल्पनाया लघुत्वात्। न च भवन्मतेपि तद्धर्मावच्छिन्नत्वांशे प्रतियोगिसंसर्गीभूतप्रतियोगित्वविशेषणतया संसर्गता
याः कल्पनीयतया संसर्गताकल्पनमावश्यकमिति गच्छाम भवन्मतेपि अवच्छिन्नप्रतियोगिताकत्वांशे तद्धर्मनिष्ठप्र
कारतानिरूपितसंसर्गतायाः कल्पनीयतया संसर्गताकल्पनस्य तुल्यत्वादिति चेन्न। अभावांशे प्रतियोगिविशेषण
धर्मस्य प्रकारतामते प्रतियोगिप्रकारतानिरूपिताया म[illegible]तियोगित[illegible]ष्ठसंसर्गतासेव प्रतियोगिविशेषण[illegible]निष्ठप्र

वि·वा° १० 10

कारतानिरूपितताया अवच्छिन्नत्वनिष्ठसंसर्गतातन्निरूपिततापि एतावतैवता दृशाधर्मस्यस्वावच्छिन्नप्रतियोगिताकत्वरूपसंसर्गभान निर्वा
हात् । एवं च तद्धर्मावच्छिन्नत्वनिवेशोपि तत्प्रतियोगितानिरूपकत्वप्रतियोगिसंसर्गतावाच्छिन्नत्वसमवायावच्छिन्नत्वप्रतियोगित्वनि
रूपकत्वेषु एकैकसंसर्गताकल्पनस्य तत्त्यक्तयाज वत्तादृशावच्छिन्नत्वनिष्ठसंसर्गतानिरूपिततत्तद्धर्मनिष्ठसंसर्गताकल्पनेन न
च समवायात्तादृशावच्छिन्नत्वनिष्ठसंसर्गतानिरूपिततत्तद्धर्मनिष्ठप्रकारताकल्पनेन समस्तुल्पमया भवतां संसर्गतायां प्रकारतात्वा
दिकल्पनस्याधिक्यात् । न च भवन्मतेऽपि तादृशप्रकारतायाः पारतन्त्र्यनिर्वाहाय तत्र प्रतियोगिनिष्ठविशेष्यतानिरूपितप्रका
रतावच्छिन्नत्वकल्पनमधिकमिति वाच्यं भवन्मतेऽपि तद्धर्मनिष्ठप्रकारताविशेषात्मकसंसर्गतेति । पारतन्त्र्यावच्छिन्नत्वानुयो
गिकसंबन्धविशेषावच्छिन्नत्वस्याधिकस्य कल्पनीयतया साम्यात् । अथ एवं किमेतावता सूक्ष्मगवेषणायासेन । अस्तु संस
र्गताविशेषाणां प्रकारतादिविशेषरूपतानैतावतापि संसर्गस्य विशिष्टधीविषयतासिद्धिः । उक्तरीतिविघटितनिर्युक्ति
कसिद्धान्तानुरोधेन संसर्गस्यापि विषयतात्वस्य प्रकारतात्वादिव्यापकताभंगभीरुतया द्वाभ्यां भवता द्विनिर्वहति ॥ संस
र्गतया च संसर्गप्रकारतायां विशेष्यतायां च निरूप्यनिरूपकभावो यः संबन्धविशेषो ऽनुपगन्तव्यः । स च संबन्धः । का श्री
र्यत्वकारणत्वाधेयत्वाधारत्वप्रतियोगित्वानुयोगित्वादिरिनामिथस्तादृशसंबन्धस्वरूपविशेषः । परापर्यायाभ्रमे १०

वचा। अन्यथा तत्त्वेन संबंधेन तत्प्रकारकत्वमित्येतदर्थस्य दुर्वचत्वात्। न च तत्संसर्गकत्वे सति तन्निष्ठविशेष्यता निरूपिततत्प्रकारकत्वमेव
तेन संबंधेन तत्प्रकारकत्वमिति वाच्यं। तथा सति भूतलादौ संयोगेन घटादिकं समवायेन च रूपादिकमवगाहमानाया धियो भूतलांशे
संयोगेन रूपादिप्रकारकत्वस्य समवायेन घटादिप्रकारकत्वस्यापत्तेः। एवं समवायेन कपालांशे संयोगेन च भूतलांशे घटम
वगाहमानाया बुद्धेः समवायेन भूतलांशे संयोगेन च कपालांशे घटप्रकारकत्वापत्तेः। तत्स्वीकारे च तन्निष्ठविशेष्यता
निरूपिततदीयसंसर्गता निरूपिता या तदीयप्रकारता तच्छालित्वमेव तदंशे तेन संबंधेन तत्प्रकारकत्वं यस्य यः संबंधो
यत्र भासते तदीयविशेष्यतातदीयप्रकारताभ्यामेव तदीयसंसर्गतायाः निरूप्यनिरूपकभावान्नोक्तातिप्रसंगः। न च प्र
कारतायाः संसर्गविशेषावच्छिन्नतया तत्संसर्गावच्छिन्नतदीयप्रकारता निरूपिततदीयविशेष्यताकत्वमेव तेन संबं
धेन तदंशे तत्प्रकारकत्वमस्तु किमुक्तनिरूप्यनिरूपकभावेनेति वाच्यं। संसर्गनिष्ठावच्छेदकतानिरूपकत्वरूपसंसर्गावच्छि
न्नत्वस्य प्रकारतायां स्वीकृतावेव संसर्गताप्रकारतयोः निरूप्यनिरूपकभावसिद्धेः संसर्गतायाः संसर्गनिष्ठावच्छेदकता
रूपत्वात्। न चैवं सति प्रकारतयैव समं तस्या निरूप्यनिरूपकभावोऽस्तु। अस्तु विशेष्यतयापि चरमोक्तबुद्धिनिरूपितायाः
समवायनिष्ठसंसर्गतानिरूपितघटप्रकारतायाः भूतलनिष्ठविशेष्यतानिरूपितत्वविरहात् संयोगनिष्ठसंसर्गताभि

२१ छविशेष्यतानिरूपितत्वविरहात्संयोगानिष्ठसंसर्गतानिरूपितनत्वप्रकारतायाश्चकपालविशेष्यतानिरूपितत्वविरहादुक्तातिप्रसंग
वारणाच्छितिवाच्यं।विनिगमनाविरहेणैवविशेष्यतयापिसमंतस्यापिनिरूप्यनिरूपकताविंसिद्धेर्नित्यरूहत्वात्।एवंचविशेष्यताप्रका
रतयोःसाक्षान्निरूप्यनिरूपकभावोप्रामाणिकः।किंतुप्रकारतायांविशेष्यतानिरूपितसंसर्गतानिरूपितत्वमेवविशेष्यतानि
रूपितत्वंविशेष्यतायांप्रकारतानिरूपितसंसर्गतानिरूपितत्वमेवचप्रकारतानिरूपितत्वंच।कार्यकारणभावावच्छेदककोटौयत्र
प्रकारताविशेष्यतयोर्निवेशस्तत्रसंसर्गस्याप्यवश्यंनिवेशात्।तयोर्निरूपकभावानभ्युपगमेपिगौरवानवकाशादितिध्येयं।
प्रकारताचद्विविधा।निरवच्छिन्नाविशेषांतरावच्छिन्नाच।तत्रनिरवच्छिन्नाघटइत्याद्याकारकज्ञानीयघटत्वादिप्रकारतात
त्रस्वरूपतएवघटत्वादेर्भानात्।विशेषांतरावच्छिन्नाचघटत्ववदितिज्ञानेतत्रघटत्वत्वरूपधर्मांतरस्यविशेषणत्वात्।तादृशी
चप्रकारताज्ञानसखंडोपाधिभिन्नैर्नस्वीक्रियते।अवच्छिन्नाचघटत्ववदित्यादिज्ञानीयघटादिप्रकारता।तत्रघटत्वादेरवच्छेद
कत्वात्।नचतादृशप्रकारतायाघटत्वादिनासममवच्छेद्यावच्छेदकभावोनिर्युक्तिकः।इत्थंवदित्यादिज्ञानात्तादृशज्ञा
नस्यघटांशेपिनिरुक्तप्रकारतयैववैलक्षण्यस्योपपत्तेरितिवाच्यं।तादृशज्ञानीयघटादिप्रकारतायाघटत्वाद्यवच्छिन्नत्वानुप श्री
गमेइत्थंवदन्तत्वंघटश्चेत्याद्याकारकसमूहालंबनात्मकज्ञानघटवत्तत्वंइत्थंचेतिसमूहालंबनस्यवैलक्षण्यानुपपत्तेः। २१

रूपेणैव घटं जानामीत्यस्य च घटत्वोभयप्रकारत्वात्। भूतलत्वांशे प्रकारकत्वाच्चाप्रमात्वे पुनः घटे घटत्वावच्छिन्ना घटीया प्रकारता। अत्रांशे च घ
टत्वावच्छिन्नाप्रतिप्रकारतावैलक्षण्यापातः तयोर्वैलक्षण्यं। वस्तुतस्तु घटत्वादिनिष्ठप्रकारतानिरूपितत्वमेव घटादिप्रकारताया
घटत्वाद्यवच्छिन्नत्वेन च प्रकारताविशेष्यतयोरेव निरूप्यनिरूपकभावो न तु प्रकारतयोरपीति वाच्यं। तत्र घटादिनिष्ठाया भूत
लादिनिष्ठविशेष्यतानिरूपितप्रकारताया एव घटत्वादिप्रकारतानिरूपितविशेष्यतात्मकत्वात्। तादृशप्रकारतयोर्निरूप्यनि
रूपकभावोपपत्तेः॥ केचित्तु घटत्वप्रकारतानिरूपितविशेष्यतावच्छेदेन भूतलांशे घटस्य प्रकारता घटवदिति तादृशज्ञानेन स्वी
क्रियते। अत एवोक्तज्ञानयोर्भेद इत्याहुः। तच्चिन्त्यम्। परे तु घटवदित्याद्याकारकं विशिष्टविशेषणकं ज्ञानं द्विविधं। विशिष्टवै
शिष्ट्यबोधात्मकं केवलविशेष्यविशेषणं तत्र च विशेषणतामिति। सा घटघटत्वाद्यवगाहि तत्र प्रथमे घटत्वादेः प्रकारताव
च्छेदकत्वं। द्वितीये तु प्रकारतात्मकविशेष्यतानिरूपितप्रकारत्वं। न तु प्रकारतावच्छेदकत्वमपीत्याहुः। तत्त्वं विशिष्टवैशिष्ट्य
विचारे स्फुटीभविष्यति। विशेष्यता च क्वचिन्निरवच्छिन्ना क्वचिच्च विशेषणतावच्छिन्ना च। तत्र निर्द्धर्मितावच्छेदकके
घट इत्याद्याकारकज्ञाने घटत्वादिप्रकारतानिरूपिता विशेष्यता निरवच्छिन्ना। अयं घट इत्याद्याकारकसधर्मितावच्छेद
कघटत्वादिविशिष्टबुद्धौ च घटत्वादिप्रकारतानिरूपितविशेष्यता इदन्त्वावच्छिन्ना अत एव इदन्त्वादिकं तत्र धर्मिताव

च्छेदकमित्युच्यते विशेष्यतावच्छेदकताया एव धर्मितावच्छेदकतापदार्थत्वात् विशेष्यतानिरूपितमवच्छेदकत्वं च न तन्निरूपितप्रकारत्वं त
था सति घट इत्यादिज्ञाने च अयं घट इत्यादिज्ञाने च घटत्वस्य धर्मितावच्छेदकत्वापत्तेः। निर्धर्मितावच्छेदककविशिष्टबुद्धि
विशेषप्रसंगाच्च। किंतु प्रतियोगित्वादिनिरूपितावच्छेदकत्ववत्स्वरूपविशेषः। पदार्थान्तरमेव वा अथवा प्रकारताविशेष
एव तत्। अन्यथा सधर्मितावच्छेदककज्ञानस्य धर्मितावच्छेदकप्रकारकत्वोपपत्तये तन्निष्ठतज्ज्ञानीयप्रकारतानिरूपकत्व
नियोगाद्वात्। न च ज्ञानान्तरस्य तद्धर्मनिष्ठप्रकारतयोपपत्तेर्नातिरिक्तप्रकारताकल्पनमिति वाच्यम्। एवमपि तद्धर्मिता
वच्छेदकसमानविषयताकानेकज्ञानेषु तादृशप्रकारताप्रतियोगित्वकल्पनापेक्षया तु असाधारणैकधर्मितावच्छेदकता
यां प्रकारतात्वकल्पने लाघवात्। न चैवमयं घट इत्यादिज्ञाने इदंत्वादेः स्वस्यापि धर्मितावच्छेदकत्वापत्तिरिति नेतो ऽयमयं
इत्याकारकस्मरणे प्रसंग इति वाच्यम्। यत्तत्तदीयप्रकारतानिरूपिताया धर्मितावच्छेदकताया आश्रय एव तदीयध
र्मितावच्छेदकः उक्तस्थले च इदंत्वनिष्ठधर्मितावच्छेदकतायाः स्वात्मप्रकारतया निरूप्यनिरूपकभावविरहादिति
प्रसंगः। न चैवमपि इदंत्वादिकं घटत्वादेरपि धर्मितावच्छेदकं न स्यात्। तन्निष्ठधर्मितावच्छेदकतया घटत्वादिप्रकारता श्री
या अपि निरूप्यनिरूपकभावे मानाभावात् परपरपरपा। निरूप्यनिरूपकभावसम्पर्केणापि सत्त्वादिति वाच्यम्। तन्नुदे १२

शेषेनैव धर्मितावच्छेदकत्वविशेषणीयप्रकारत्वयोरपि निरूप्यनिरूपकभावोपगमात् यत्प्रकारतानिरूपितत्वावच्छेदेन विशेष्यतायां यद
वच्छेदकत्वम् एवं तद्धर्मितावच्छेदकः उक्तस्थले च स्वप्रकारतानिरूपितत्वावच्छेदेन विशेष्यतायाः स्वावच्छेद्यत्व । मतेन स्वीश्रा
स्वधर्मितावच्छेदकत्वापत्तिरित्याहुः ॥ विशेष्यता च समूहालंबने प्रकारभेदाद् भिद्यते समूहालंबनस्य प्रत्येकप्रकारकज्ञानसा
मग्रीसामाज्ञविषयततया प्रत्येकप्रकारकज्ञानीयनानाविशेष्यताप्रतियोगित्वस्यैव तः असत्वात् । अयं घटः दंडी कुंडली साधा
कारैकैकधर्मितावच्छेदककापरधर्मप्रकारकज्ञाने धर्मितावच्छेदकतायाः प्रकारता विशेष्यत्वं मते तदुभयप्रकारतानिरूपिता
एकैव विशेष्यता धर्मितावच्छेदकज्ञानांतरसाधारणप्रकारतास्वीकारकमते तु प्रकारभेदेन विशेष्यताभेदः । यदि च समूहा
लंबने विलक्षणो विशेषणविशेष्यतावच्छेदकभावानापन्नखड्गकुंडलाद्युभयविशिष्टविषयकः खड्गी कुंडली चैत्रइसाधा
कारकोबाधोऽनुभवसिद्धस्तदा तत्राप्युभयप्रकारतानिरूपितैकविशेष्यता अन्यथा समूहालंबनात्तद्वैलक्षण्यानुपप
त्तेः । एवं मिथो विशेषणविशेष्यतावच्छेदकभावानापन्नं खड्गकुंडलोभयादिकं यत्र शौर्यादिधर्मितावच्छेदकतयाभास
ते खड्गी कुंडली चैत्रः शूर इत्साधाकारके तादृशबोधे च खड्गकुंडलोभयप्रकारतानिरूपितैकविशेष्यतातादृ
शविशेष्यता च तादृशोभयावच्छिन्नशौर्यादिप्रकारतानिरूपितविशेष्यतातो भिन्नाऽभिन्ना वेति तु पूर्वोक्त

वि॰वा॰ वद्द्दन्तीयं स्वंखड्गाद्येकतरधर्मितावच्छेदकतापन्नमेवापरस्य कुंडलादेर्विधेयधर्मितावच्छेदकत्वं यत्र तत्र खड्गादिप्रकारतानिरूपितकुंड
१३ लाद्यवच्छिन्नविशेष्यताविधेयप्रकारतानिरूपितोभयधर्मावच्छिन्नविशेष्यतयोरभेदः॥ अन्यथा मिथो विशेषणविशेष्यतावच्छे
13 दकभावापत्त्यापन्नखड्गकुंडलोभयधर्मावच्छिन्नविशेष्यकशाब्दविधेयकबोधेऽव यत्र स्वातंत्र्येण कुंडलसखड्गधर्मिता
वच्छेदकतयाभानं तादृशसमूहालंबनात्तस्य वैलक्षण्यानुपपत्तेः। एवं च सति खड्गादिः खड्गादिप्रकारतानिरूपितविशेष्यता
या अवच्छेदकत्वेपि यथा न तस्य स्वधर्मितावच्छेदकत्वं तथा पप्रादितं प्रागेव। तत्रोक्तविशेष्यते भिन्नेऽवकिंचिद्दृश्यकविशेष्य
तापरविशेष्यतावच्छेदकभावापत्त्रेति समूहालंबनाद्विशेषदुस्तथाहुः। प्रकारत्वादिवद्विधेयत्वमपि विषयतांतरं नत्त्वक्त
प्रकारत्वमेव तत्तद्धर्मितावच्छेदकस्थापितयात्वापत्तेः। अथ विशेष्यतावच्छेदकताभिन्नमुख्यविशेष्यतानिरूपितप्रकार
ते च विधेयतापर्यवसानेवह्निमान् पर्वतो इत्यादौ च पर्वतत्वादिरूपधर्मितावच्छेदकनिष्ठप्रकारताधर्मितावच्छेदकतात्मिकैव धर्मि
तावच्छेदकतायाः प्रकारतात्वसत्त्ववस्थापितत्वात्। अतो न तत्र पर्वतत्वादेर्विधेयतापत्तिः। नादृशज्ञानेवह्न्यादेरवि
वह्निमत्पर्वतवान्देशइत्यादौ च वह्न्यादेर्विधेयतावारणाय मुख्यविशेष्यतानिरूपितत्वविशेषणं। मुख्यत्वं च विशेष्यता श्री
यां प्रकारतानवच्छिन्नत्वं प्रकारतोभिन्नत्वं वा। न च विशेष्यतावच्छेदकताभिन्नत्वाद्युपस्थितिं विनापि पर्वतो वह्नि १३

मानित्वाद्यनुमित्यनंतरं पर्वतो वह्निमनुमिनोमीत्याकारकस्यैव वह्न्यादिविधेयकत्वावगाहिनोऽनुव्यवसायस्योत्पन्ना निरुक्तप्रकारता
याविधेयतात्मकत्वं नोपपद्यते इति वाच्यं । वह्निप्रकारकानुमितित्वस्यैव तादृशानुव्यवसायविषयत्वोपगमात् । न चैवं वह्निमा
न्पर्वतो घटवानित्यनुमित्यनंतरमपि तादृशानुव्यवसायापत्तिरिति वाच्यं । निरुक्ततन्निष्ठप्रकारताकत्वस्य तत्प्रकारकानु
मितित्वव्यापकतया तादृशव्याप्यस्य संभवात् । अभवन्मतेऽपि तद्विधेयकानुमितौ यथा कथंचिदुपस्थिततद्विधेयकत्वग्रहकारणा
यत्तत्तद्विधेयकत्वघटितव्याप्याया आवश्यकत्वात् । न च तादृशानुव्यवसायेतन्निष्ठविलक्षणविषयतारूपविधेयतायाः प्रति
योगितासंबंधेन हेतुत्वकल्पनापेक्षया निरुक्ततन्निष्ठप्रकारताया गुरुत्वादारादयावृत्तसंबंधेन हेतुताकल्पने गौरवाद्विलक्षणविष
यतासिद्धिरिति वाच्यं । कार्यकारणभावलाघवानुरोधेनातिरिक्तपदार्थसिद्धेः सिद्धांतविरुद्धत्वात् । अन्यथा धूमादि
प्रतिबंधकतावच्छेदकतया तस्याः लोकादिलिंगकानुमितिव्यावृत्तविलक्षणविषयतासिद्धिप्रसंगात् । न च निरुक्तप्रका
रतातोऽतिरिक्तैव विधेयताख्यविषयता । अन्यथा धर्मितावच्छेदकताभिन्नत्वाद्यनुपस्थितिदशायां वह्निमान्पर्वतो घट
वानित्याद्यनुमित्यनंतरं पर्वते घटमनुमिनोमि न वह्निमित्याद्याकारकस्यैव वह्निविधेयकत्वाभावावगाहिनोऽनुव्यव
सायस्यापलापप्रसंगात् । वह्न्यादिप्रकारकानुमितिविषयत्वस्य वह्निप्रकारकत्वसामान्याभावावलंबनत्वासंभवादिति

विषु० वा० प वाच्यांशधर्मितावच्छेदकताभिन्नत्वाद्यनुपस्थितिदशायां तादृशप्रतीतेः प्रामाणिकत्वे निरुक्तप्रकारतायामेव विधेयतात्वात् स्वधर्मविशे
१५ षं स्वीकृत्य तेन रूपेण निरुक्तप्रकारतायाः प्रतियोगितासंबंधावच्छिन्नाभावस्यैव तादृशप्रतीतिविषयतायाः स्वीकरणीयत्वात्। भवन्म
15 तेऽपि संबंधादिभेदभिन्नविधेयतानामननुगमाय तादृशातिरिक्तधर्मस्वीकारस्यावश्यकत्वात्। अन्यथा विधेयतानामननुगतिप्रसक्त
सामान्यधर्मावच्छिन्नाभावासंभवेन तत्तद्व्यक्तित्वावच्छिन्नाभावकूटस्यैव तादृशप्रतीतिविषयतायाः स्वीकरणीयतया अभावकू
टस्य विशिष्ययुगपत्सहस्रेणापि ग्रहीतुमशक्यतया तादृशप्रतीतेरेवानुपपत्तेः। विषयताप्रतियोगिकाभावत्वेन तावदभावानीतद्वि
षयत्वोपगमे तादृशप्रतीतेः प्रतियोगितावच्छेदकानवगाहितया वह्निमनुमिनोमीत्यादिप्रतीतेर्विशेषितत्वानुपपत्तेरिति चेन्न। नि
रुक्तप्रकारताया एव विधेयतात्वे पृथिव्यां जलत्वादिभेदः ह्रदे धूमाभाववत्त्वाद्याकारकसाध्यविशेष्यकानुमितौ नातद्विधेयकत्वा
नुपपत्तेः। तथाविधानुमितिविशेष्यतायां विधेयतात्वोपगमान्नेयमनुपपत्तिरिति चेत्तर्हि तादृशानुमितिविशेष्यतायास्तत्समान
प्रकारकसमानविशेष्यकपृथिव्यादिसाध्यकानुमितावपि सत्त्वेन तस्या अपि इतरभेदादिविधेयकत्वापत्तेः। अथ पृथिव्यादिप
क्षकतादृशानुमितितत्साध्यकतादृशानुमित्योर्भिन्नभिन्नैव तादृशविशेष्यता। एवं च साध्यविशेष्यकानुमितिविशेष्य श्री
तायामेव विधेयतात्वमभ्युपेयत इति नोक्तातिप्रसंग इति चेन्न। साध्यविशेष्यकानुमितानात्मकं विशेष्यतान्तरं तथाविध १५

यतात्मकविशेष्यतोपगमेऽस्मन्मते पृथिव्यामित्याद्याकारकपृथिवीसाध्यकानुमितौ विधेयतानात्मकं विशेष्यतान्तरं तथाविधप्रत्यक्षे चात्म
विशेष्यत्वमिति तिसृणां विशेष्यतानां कल्पनापेक्षया प्रत्यक्षानुमितिसाधारण्येकविशेष्यतायाः साध्यविशेष्यकसाध्यविशेषण
कानुमितिसाधारण्येकस्या विधेयतायाश्च कल्पनस्यैवोचितत्वात्। न चास्मन्मते अनुमितौ या विधेयतात्मिका विशेष्यता सैव प्रत्यक्षे
पीति न विशेष्यतात्रयकल्पनमिति वाच्यम्। प्रत्यक्षे विधेयतात्मिकाया अनात्मिकाया वा विशेष्यतायाः स्वीकारे तत्र विनिगमनाविरहात्। य
त्तु साध्यविशेषणकानुमितौ लघुत्वस्य निरुक्तप्रकारतैव विधेयता। अतिरिक्तविधेयता तु साध्यविशेष्यकानुमितावेवत्र नं न साध्यविशे
षणकानुमितिव्यक्तिष्वतिरिक्तविधेयतासंबंधकल्पनापेक्षया तन्निरूपितस्वल्पतरनिरुक्तप्रकारतासु विधेयतात्वकल्पने ला
घवादिति॥ तदपि न चारु। तादृशप्रकारतायां विधेयतात्वोपगमे पर्वतो वह्निमान् पर्वतो निर्धूमः स्यादित्याकारकसमूहालंबनापत्त्यात्म
कज्ञानस्य वह्न्यादिविधेयकत्वाभावप्रतीतेरनुपपत्तेः। न चेष्टापत्तिः तथा प्रतीतौ तादृशापत्त्यनंतरं पर्वते धूमाभावमापादयामि न
तु वह्निमित्याकारकवह्निविधेयकत्वाभावप्रतीतेरनुपपत्तेः। एतेन साध्यविशेष्यकानुमितिरेवाप्रामाणिकी अप्रसिद्धसाध्यकस्थ
ले विशेषे विशेषणमिति रीत्या साध्यविशेषणकानुमितेरेवोत्पत्तेर्विशिष्टसामान्ये विशेषणज्ञानहेतुतायाः निर्युक्तिकत्वात्।
तथा च निरुक्तप्रकारतैव विधेयता। भावसाध्यकस्थले तु साध्यविशेष्यकानुमितेरप्रामाणिकतयात्र सुतरामेवेत्यपि नि

वि० प० वा० रस्तं यत्तु अनुमितावापत्तौ च तद्व्याप्यवत्ताज्ञानजन्यत्वमेव तद्विधेयकत्वमिति तदसत्। यतोऽतिरिक्तविधेयतानभ्युपगमे तद्व्याप्यवत्ताज्ञा
१५ नस्य स्वानंतरोत्पन्नतत्प्रकारकानुमितित्वादिकमेव जन्यतावच्छेदकं वाच्यं न तु तत्र तद्विधेयतानिवेशनसंभवः। आत्माश्रयप्र
15 संगात् तथा च सिद्ध्यभावापादकव्यतिरेकनिश्चयरूपकारणासमवहिततद्व्याप्यवत्ताज्ञानानंतरोत्पन्नयावद्वह्निमत्पर्वतत्वावच्छि
न्नपक्षकघटादिविधेयकानुमित्यापत्तौ अपि तादृशज्ञानजन्यतया वह्निविधेयकत्वप्रसंगात् इति पक्षतादिविशेषादिजन्यत्वस्य विधे
यताशरीरघटकत्वे पक्षताद्युपस्थितिविरहकाले सर्वानुभवसिद्धायावद्वह्निनानुमिनोमीत्याकारकप्रतीतेरपलापप्रसंगात्।
न च पक्षताविशेषादिजन्यत्वविशिष्टस्वव्याप्यवत्ताज्ञानजन्यत्वसंबंधेन वह्न्यादिमदन्यत्वमेव तादृशप्रतीतिविषयोऽस्तु।
तत्र न पक्षताद्युपस्थितेरपेक्षिता। संबंधज्ञानस्य विशिष्टबुद्धावहेतुत्वादिति वाच्यं। अनंतपदार्थघटितता तादृशधर्मस्य
संबंधत्वे मानाभावात्। एवंमेव तन्मते शाब्दबोधस्य सविधेयकत्वानुपपत्तिस्तस्य व्याप्यवत्ताज्ञानाजन्यत्वात्। न च तत्र निरु
क्तप्रकारेणैव विधेयतेति वाच्यं। पर्वतो वह्निमानित्यादिवाक्यजन्यशाब्दबोधे वह्न्यादेर्विधेयत्वानुपपत्तेः। न चात्र वह्नेरुद्देश्यपर्वता
धेयत्वमेव विधेयं न तु पर्वतांशे वह्निरिति वाच्यं शाब्दबोधे चरमनिर्दिष्टपदार्थस्यैव विधेयत्वात् अत एवान्यकारोद्देश्यमेवमे श्री
यत्र यद्दत्यादौ विधेयत्वेन तात्पर्यविषयस्यान्यकारादेः प्राङ्निर्दिष्टपदोपस्थाप्यत्वपातद्विधेयकान्वयबोधासंभवादालंकारिका १५

विधेयतानिर्मर्षदोषमुद्धरंति। अनेकगुणानां गुणत्वमित्यादौ गुणत्वस्यैवोद्देश्यताच्छेदकतया विधेयतया चान्वयबोधानुपपत्तेः। किं
तावद्दूमानोपाध्यायैः। विशेष्यस्य विधेयत्वे तत्र गुणत्वस्य तदनुपपत्त्यापादनाद्दशाशंका नासंगतः। न च परार्थानुमाने गुणत्वरूपल
क्ष्यतावच्छेदकधर्मावच्छिन्ने इतरभेदसाधनाय प्रयुक्तादितरव्यापकीभूताभावप्रतियोगी गुणत्ववानयमित्यादृशोपनयाव
यवादन्वयबोधानुपपत्तिरेवेति शंकां किमिति वाच्यं। तत्र रक्तदंडवान् रक्तदंडवानित्यादौ विव विधेयांशे व्याप्तिभानाधिकेन। गुणत्व
संबंधिन एवाभेदसंबंधेन विधेयतयान्वयबोधानुपपत्तिरिति हाजः। न च नामार्थयोः साक्षादन्वयस्यास्वत्वन्नतया पर्वतो
वह्निमानित्यादौ पर्वतांशे शेषकथं विधेयतयान्वयबोध इति वाच्यं। साक्षाद्विशेषणविशेष्यभावेनान्वयस्यैव नामार्थयोरनभ्युपग
मात्। अत्र परंपरयैव विशेष्यविशेषणभावोपगमात्। अथ शाब्दबोधे चरमनिर्दिष्टपदार्थस्य विधेयत्वे वपुर्विरूपाक्षमित्यादौ
अक्ष्णो वैरूप्यस्य विधेयत्वानुपपत्तिः। वैरूप्यविशिष्टस्याक्ष्ण एव तत्र वपुरंशे विधेयत्वे अलक्ष्यजन्मनेत्यत्रापि अलक्ष्यज
न्मतया एव विधेयतया तात्पर्यविषयत्वमित्यस्य वक्तुं शक्यतया अलक्ष्यतायाश्च विधेयत्वेन अविमृष्टविधेयांशोदाह
रणतया अनुपपत्तेः। यदि च तत्र मुख्यस्य जन्मनो विवक्षितमहादेवापकर्षासंपादकतया न विधेयत्वेन विवक्षितत्व
अपितु जन्मनो लक्ष्यताया एवेति मन्यते तदा तु त्वं प्रकृतेऽपीति चेन्न समासातिरिक्तस्थले चरमनिर्दिष्टस्य विधेयत्वा

विष०पत्र नियामकत्वात्। एवंनिरुक्तप्रकारतायाविधेयतात्वे द्वितीयमौर्वीमित्यस्याद्देश्येविधेयत्वेनविवक्षितस्यसमासघटकपूर्वपदेनप्रतिपादनेविधेयाविम
१६ र्षः मौर्वी द्वितीयामित्यस्यासमस्तपदेप्रतिपादनेद्दोषोद्धारद्गुत्यालंकारिकमतादविरोधश्चेति।। विधेयताचतन्निरूपितोद्देश्यतापि
प्रकारतादिभिन्नविषयताविशेषएव।। नचैवंतस्योद्देश्यतानुपपत्तेः।। नचविधेयतानिरूपकत्वमुद्देश्यत्वंतत्त्वयद्देशोविधे
16 यस्यविधेयत्वंतस्यविशेष्यत्वेप्रकारकत्वेचावृत्तमेवेति किमुद्देश्यतारूपातिरिक्तविषयतोपगमेनेतिवाच्यम्।। उद्देश्यत्वमे
वातिरिक्तंतन्निरूपकत्वमेवविधेयत्वमित्यस्यापिवक्तुंशक्यतयाविनिगमनाविरहेणोभयस्यैवातिरिक्तत्वसिद्धेः।। इदंतुव
ध्येयं।। अस्तुविधेयत्वमुद्देश्यत्वमतिरिक्तंतयोर्विषयतात्वेमानाभावः।। पर्वतोवह्निमानित्यनुमितेःपर्वतत्वद्यावृत्तत्वाविधप्र
पञ्चसाधारणविशेष्यताप्रकारतास्वीकारस्यावश्यकतयाततएवतादृशज्ञानस्यतद्विषयकत्वोपपत्तेः।। प्रकारताहीनां
तत्वानुपगमेतादृशानुमित्यादौनीबाधायप्रतिबध्यप्रसंगः विरोधिज्ञानाप्रतिबंधकत्वप्रसंगश्च।। प्रकारताहीना
मेवतादृशप्रतिबध्यप्रतिबंधकभावावच्छेदकत्वादिति।। ।। श्री।।। ॐ गुरुविषयतावादः समाप्तः।।।। भैरवोजय श्री
तु।। ।। ।। ।। = = ० ॐ ॐ ॐ श्रीरस्तु।। श्रीः।। १६